346sk02

२

तत्पुरुषसमासः - द्वितीयादितत्पुरुषसमासः

प्रस्तावना

अव्ययीभावसमासात्परं तत्पुरुषः उपस्थाप्यते। "तत्पुरुषः" इत्यधिकृत्य अयं समासः प्रवर्तते। प्रायेण उत्तरपदार्थप्रधानः अयं समासः। उत्तरपदस्यार्थः उत्तरपदार्थः। उत्तरपदार्थः प्रधानः यस्मिन् स उत्तरपदार्थप्रधानः। यथा राज्ञः पुरुषः इति विग्रहे राजपुरुषः इति। अत्र समस्यमानयोः पदयोः उत्तरपदस्य पुरुषपदस्यार्थ एव प्रधानः। यथा राजपुरुषमानय इत्युच्यते चेत् पुरुषरूपार्थस्य आनयनम् इष्टं न तु राजन्पदार्थस्य राज्ञः। एवं सामान्यतया उत्तरपदार्थप्राधान्यं तत्पुरुषसमासे दृश्यते।

अयं च तत्पुरुषसमासः समानाधिकरणः व्यधिकरणः चेति द्विधा विभक्त इति वक्तुं शक्यते। समानम् अधिकरणं ययोस्ते समानाधिकरणे। समानविभक्तिके पदे इति। समानाधिकरणे अस्य स्तः इति समानाधिकरणः इति अर्शआदित्वादच्प्रत्ययः। एवमेव व्यधिकरणे नाम असमानविभक्तिके पदे। व्यधिकरणे अस्य स्तः इति व्यधिकरणः इति अर्शआदित्वादच्प्रत्ययः। अर्थाद् यस्मिन् तत्पुरुषे समस्यमानानि पदानि समानविभक्तिकानि न सन्ति। अस्मिन् पाठे आदौ तत्पुरुषाधिकारस्य वर्णनमस्ति। ततः विशेषप्रयोजनसाधनाय द्विगुसमासस्य तत्पुरुषसंज्ञा वर्णिता। ततः व्यधिकरणतत्पुरुषसमासविधायकानां द्वितीया श्रितातीतेत्यादीनां सूत्राणामालोचनम् अत्र भवति।

उद्देश्यानि

इमं पाठं पठित्वा भवान्/भवती -

- तत्पुरुषाधिकारपरिधिं जानीयात्।
- द्विगोः तत्पुरुषसंज्ञा भवति इति जानीयात्।
- व्यधिकरणतत्पुरुषविधायकानि सूत्राणि जानीयात्।
- षष्ठीसमासनिषेधकानि सूत्राणि जानीयात्।

[२.१] तत्पुरुषः॥ (२.१.२२)

सूत्रार्थः - "शेषो बहुव्रीहिः" इत्यस्मात् सूत्रात् पूर्वपर्यन्तं तत्पुरुषाधिकारः।

सूत्रव्याख्या - इदम् अधिकारसूत्रम्। अनेन सूत्रेण तत्पुरुषसमासाधिकारः विधीयते। सूत्रेऽस्मिन् तत्पुरुषः इति पदं प्रथमैकवचनान्तम्। "प्राक्कडारात्समासः" इत्यधिक्रियते अत्र। तत्पुरुषसमासस्याधिकारः अनेन सूत्रेण विधीयते। अयमधिकारः "शेषो बहुव्रीहिः" (२.२.२३) इत्यस्मात् सूत्रात्प्राक्पर्यन्तम्। एवं "तत्पुरुषः" इत्यस्मात् सूत्रात् "शेषो बहुव्रीहिः" (२.२.२३) इत्यतः प्राग् सूत्रैः यः समासः विधीयते स तत्पुरुषसंज्ञको भवति।

[२.२] द्विगुश्च॥ (२.१.२३)

सूत्रार्थः - द्विगुरपि तत्पुरुषसंज्ञकः भवति।

सूत्रव्याख्या - इदं संज्ञासूत्रम्। अनेन सूत्रेण द्विगुसमासस्य तत्पुरुषसंज्ञा विधीयते। सूत्रेऽस्मिन् द्विगुः इति पदं प्रथमैकवचनान्तं, चेत्यव्ययपदम्। "तत्पुरुषः" इति पूर्वसूत्राद् अधिकृतम्। तत्पुरुषः इति संज्ञापदं द्विगुरिति संज्ञिपदम्। एवं सूत्रार्थः भवति - "द्विगुरपि तत्पुरुषसंज्ञः भवति" इति।

इतः अग्रे "तद्धितार्थोत्तरपदसमाहारे च" इत्यनेन सूत्रेण तत्पुरुषाधिकारे समासत्रयस्य विधानम् अभवत्। त्रिषु च समासेषु यस्मिन् समासे पूर्वपदं संख्यावाचकं भवति तस्य समासस्य "संख्यापूर्वो द्विगुः" इत्यनेन सूत्रेण द्विगुसंज्ञा विधीयते। "आकडारादेका संज्ञा" इति एकसंज्ञाधिकाराद् अन्यथा तत्पुरुषस्य बाधको भवति द्विगुः। परन्तु द्विगोः तत्पुरुषसंज्ञा अभीष्टा, अतः विशेषेण सूत्रेण तत्पुरुषसंज्ञाया विधानं कृतम्। तेन पञ्चानां राजानां समाहारः इति विग्रहे पञ्चराजन् इत्यत्र तत्पुरुषसमासान्तस्य "राजाहःसखिभ्यष्टच्" इति टचः प्रवृत्तिर्भवति। ततः प्रक्रियाकार्ये पञ्चराजम् इति निष्पद्यते।

[२.३] द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः॥ (२.१.२४)

सूत्रार्थः - द्वितीयान्तं सुबन्तं श्रितादिप्रकृतिकैः सुबन्तैः सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण द्वितीयातत्पुरुषसमासो भवति। सूत्रेऽस्मिन् द्वितीया इति प्रथमैकवचनान्तं श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः इति तृतीयाबहुवचनान्तं पदम्। श्रितश्च अतीतश्च पतितश्च गतश्च अत्यस्तश्च प्राप्तश्च आपन्नश्च श्रितातीतपतितगतात्यस्तप्राप्तापन्नाः, तैः इति इतरेतरयोगद्वन्द्वसमासः। "सह सुपा" इत्यस्मात् सूत्रात् सुपा इत्यस्यानुवृत्तिः भवति। तस्य च श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः इत्यस्य विशेषणत्वाद् वचनविपरिणामेन तदन्तविधौ सुबन्तैः इति लभ्यते। अत्र शङ्का समुदेति यत् श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः इत्यस्य सुबन्तैः इत्यस्य च कथं सामानाधिकरण्यमिति। यतो हि श्रितादीनां सुबन्तत्वं नास्ति। येषां च सुबन्तत्वं तेषां श्रितादित्वं नास्ति। अतःश्रितादीनां शब्दानां तत्प्रकृतिके लक्षणा। अर्थात् श्रितादयः प्रकृतयः येषां ते श्रितादिप्रकृतिकाः अत्र श्रितादिपदेन गृह्यन्ते। श्रितादिभिः सुबन्तैः इत्यस्य श्रितादिप्रकृतिकैः सुबन्तैः इत्यर्थः।

"प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" "विभाषा" इति सूत्रचतुष्टयमधिकृतम्। "सुबामन्त्रिते पराङ्गवत्स्वरे " इत्यस्मात् सुप् इति पदमनुवर्तते। ततः तदन्तविधौ सुबन्तम् इति। सुबन्तम् इत्यस्य विशेषणत्वाद् द्वितीया इत्यस्य तदन्तविधौ द्वितीयान्तं सुबन्तम् इति भवति। एवं सूत्रार्थः समायाति - "द्वितीयान्तं सुबन्तं श्रितादिप्रकृतिकैः सुबन्तैः सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति" इति।

अत्र द्वितीयान्तं समर्थेन सुबन्तेन समस्यते। स च तत्पुरुषसमासः। अतः अयं समासः द्वितीयातत्पुरुषः इत्यभिधीयते।

उदाहरणम् - एतस्य सूत्रस्योदाहरणं भवति कृष्णश्रितः इति। कृष्णं श्रितः इति लौकिकविग्रहे कृष्ण अम् श्रित सु इत्यलौकिकविग्रहे प्रस्तुतसूत्रेण द्वितीयान्तं कृष्ण अम् इति सुबन्तं श्रित सु इति श्रितप्रकृतिकेन सुबन्तेन सह तत्पुरुषसमाससंज्ञं भवति। ततः समासविधायकसूत्रे द्वितीया इत्यस्य प्रथमानिर्दिष्टत्वात् तद्बोध्यस्य कृष्ण अम् इत्यस्य "प्रथमानिर्दिष्टं समास उपसर्जनम्" इत्यनेनोपसर्जनसंज्ञायाम् "उपसर्जनं पूर्वम्" इत्यनेन पूर्वनिपाते कृष्ण अम् श्रित सु इति भवति। ततः "कृत्तद्धितसमासाश्च" इत्यनेन समासस्य प्रातिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इत्यनेन सूत्रेण प्रातिपदिकावयवस्य सुपः अमः सोश्च लुकि कृष्णश्रित इति भवति। "एकदेशविकृतमनन्यवत्" इति न्यायेन कृष्णश्रितशब्दस्य प्रातिपदिकत्वस्याक्षयात् ततः प्रथमैकवचनविवक्षायां सौ कृष्णश्रित सु इति भवति। सोः उकारस्य "उपदेशेजनुनासिक इत्" इत्यनेन सूत्रेण इत्संज्ञायां "तस्य लोपः" इत्यनेन लोपे कृष्णश्रित स् इति भवति। ततः "सुप्तिङन्तं पदम्" इत्यनेन समुदायस्य पदसंज्ञायां "ससजुषो रुः" इत्यनेन सस्य रुत्वे, "खरवसानयोर्विसर्जनीयः" इत्यनेन सूत्रेण पदान्तस्य रेफस्य विसर्गादेशे कृष्णश्रितः इति रूपं सिध्यति।

एवमेव दुःखम् अतीतः दुःखातीतः, नरकं पतितः नरकपतितः, ग्रामं गतः ग्रामगतः, ग्राममत्यस्तः ग्रामात्यस्तः, ग्रामं प्राप्तः ग्रामप्राप्तः, संशयम् आपन्नः संशयापन्नः इत्यादिकम् एतस्य सूत्रस्योदाहरणम्।

पाठगतप्रश्नाः-१

१. "तत्पुरुषः" इत्यधिकारः कियत्पर्यन्तम्।

२. द्विगुश्च" इति सूत्रस्यार्थः कः।

३. द्विगुसमासस्य तत्पुरुषसंज्ञाविधाने किं प्रयोजनम्।

४. "द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" इति सूत्रेण किं विधीयते।

५. "द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" इति सूत्रस्यार्थः कः।

६. श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः इत्यत्र कः समासः, कश्च विग्रहः।

७. श्रितादिशब्दानां कस्मिन् लक्षणा।

८. "द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" इति सूत्रस्य सविग्रहम् एकमुदाहरणं देयम्।

[२.४] तृतीया तत्कृतार्थेन गुणवचनेन॥ (२.१.३०)

सूत्रार्थः - तृतीयान्तं सुबन्तं तृतीयान्तार्थकृतगुणवचनेन अर्थशब्देन च सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति।

सूत्रावतरणम् - इदं विधिसूत्रम्। अनेन सूत्रेण तृतीयातत्पुरुषसमासो भवति।

सूत्रव्याख्या - सूत्रेऽस्मिन् तृतीया तत्कृत अर्थेन गुणवचनेन इति पदच्छेदः। तृतीया इति प्रथमैकवचनान्तं पदम्। तत्कृत इति लुप्ततृतीयान्तं पदम्। अर्थेन गुणवचनेनेति पदद्वयं तृतीयैकवचनान्तम्। "प्राक्कडारात्समासः", "तत्पुरुषः", "विभाषा" इति सूत्रत्रयमधिकृतम्। "सुबामन्त्रिते पराङ्गवत्स्वरे " इत्यस्मात् सुप् इति पदमनुवर्तते। सुप् इत्यस्य तदन्तविधौ सुबन्तमिति भवति। सुबन्तस्य विशेषणत्वात् तृतीया इत्यस्य तदन्तविधौ तृतीयान्तमिति लभ्यते।

"छन्दोवत्सूत्राणि भवन्ति" इति भाष्यवचनात् "सुपां सुलुक्" इत्यादिना सूत्रेण तृतीयैकवचनस्य लुकि तत्कृत इति रूपम्। तत्कृतेनेत्यर्थः। तेन कृतं तत्कृतम्, तेनेति तृतीयातत्पुरुषः। तत्कृतपदस्य तृतीयान्तार्थाकृत इत्यर्थः। गुणमुक्तवान् इति विग्रहे "कृत्यल्युटो बहुलम्" इत्यत्र बहुलग्रहणात् कर्त्रर्थे भूतकाले ल्युटि गुणवचनशब्दो निष्पद्यते। ये शब्दाः पूर्वं गुणवाचकाः आसन् इदानीं द्रव्यवाचकास्ते एव गुणवचनशब्देन गृह्यन्ते। यथा श्वेतशब्दस्य गुणवाचकस्य गुणगुणिनोरभेदोपचारात् श्वेतगुणविशिष्टपदार्थः इत्यर्थः स्वीक्रियते। अथवा तस्मान्मतुपि "गुणवचनेभ्यो मतुपो लुगिष्टः" इति वार्तिकेन मतुपः लुकि श्वेतशब्दस्य श्वेतगुणविशिष्टपदार्थवाचकत्वम् अस्ति। एवं च श्वेतशब्दः गुणवचनः। तत्कृत इत्यस्य गुणवचनेन इत्यत्रान्वयः। एवमत्रार्थः तृतीयान्तार्थकृतेन गुणवचनेन इति। अर्थेनेत्यस्य अर्थप्रकृतिकेन सुबन्तेनेत्यर्थः। अस्य सूत्रस्यार्थः- "तृतीयान्तं सुबन्तं तृतीयान्तार्थकृत-गुणवचनेन अर्थशब्देन च सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति" इति।

अत्र तृतीयान्तं समर्थेन सुबन्तेन समस्यते। स च तत्पुरुषसमासः। अतः अयं समासः तृतीयातत्पुरुषः इत्यभिधीयते।

उदाहरणम् - तृतीयान्तस्य तृतीयान्तार्थगुणवचनेन सह समासे एतस्य सूत्रस्योदाहरणं भवति शङ्कुलाखण्डः इति। अत्र खण्डशब्दः खण्डनगुणबोधको भूत्वा ततः खण्डनगुणविशिष्टस्यांशस्य बोधकः। शङ्कुलया खण्डः इति लौकिकविग्रहे शङ्कुला टा खण्ड सु इत्यलौकिकविग्रहे प्रस्तुतसूत्रेण तृतीयान्तं शङ्कुला टा इति सुबन्तं खण्ड सु इति तृतीयान्तार्थगुणवचनेन सुबन्तेन सह तत्पुरुषसमाससंज्ञं भवति। ततः समासविधायकसूत्रे तृतीया इत्यस्य प्रथमानिर्दिष्टत्वात् तद्बोध्यस्य शङ्कुला टा इत्यस्योपसर्जनत्वात् पूर्वनिपाते शङ्कुला टा खण्ड सु इति भवति। ततः समासस्य प्रातिपदिकत्वात् प्रातिपदिकावयवस्य सुपः टाप्रत्ययस्य सोश्च लुकि शङ्कुलाखण्ड इति शब्दो निष्पद्यते। तस्य प्रातिपदिकत्वात् प्रथमैकवचनविवक्षायां सौ शङ्कुलाखण्डः इति रूपम्।

अर्थप्रकृतिकेन सुबन्तेन सह तृतीयान्तस्य समासे उदाहरणं भवति धान्येनार्थो धान्यार्थः इति।

[२.५] कर्तृकरणे कृता बहुलम्॥ (२.१.३२)

सूत्रार्थः - कर्तरि करणे च विद्यमानं तृतीयान्तं सुबन्तं कृदन्तेन सह बहुलं तत्पुरुषसमाससंज्ञं भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण तृतीयातत्पुरुषसमासो भवति। पदत्रयात्मके सूत्रेऽस्मिन् कर्तृकरणे इति सप्तम्येकवचनान्तम्, कृता इति तृतीयैकवचनान्तम् बहुलम् इति प्रथमैकवचनान्तं पदम्। तृतीया तत्कृतार्थेन गुणवचनेन इत्यस्मात् सूत्रात् तृतीया इति प्रथमान्तम् अनुवर्तते। "प्राक्कडारात्समासः", "तत्पुरुषः", "विभाषा" इति सूत्रत्रयमधिकृतम्। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सुप् इति पदमनुवर्तते। सुप् इत्यस्य तदन्तविधौ सुबन्तम् इति भवति। कर्ता च करणं च कर्तृकरणम्, तस्मिन् कर्तृकरणे इति समाहारद्वन्द्वः। तृतीयेत्यस्य सुबन्तम् इत्यस्य विशेषणत्वात् तदन्तविधौ तृतीयान्तं सुबन्तमिति लभ्यते। कर्तृकरणे इत्यस्य तृतीयान्तं सुबन्तमित्यनेनान्वयः। तेन कर्तरि करणे च विद्यमानं तृतीयान्तं सुबन्तमित्यर्थः। सुपा इत्यत्र तदन्तविधौ सुबन्तेनेति। सुबन्तेनेत्यस्य विशेषणत्वात् कृता इत्यस्य तदन्तविधौ कृदन्तेन सुबन्तेनेति लभ्यते। कृदन्तस्य सुबन्तत्वाभावात् कृदन्तशब्देन कृदन्तप्रकृतिकस्य ग्रहणम्। एवं कृदन्तप्रकृतिकेन सुबन्तेनेति तात्पर्यम्। "कर्तरि करणे च विद्यमानं तृतीयान्तं सुबन्तं कृदन्तेन सह बहुलं तत्पुरुषसमाससंज्ञं भवति" इति सूत्रार्थः।

सूत्रे बहुलग्रहणं कृतम्। बहुलशब्दस्य अर्थः-

"क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव।

विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति।।" इति।

अतः कर्तरि करणे च या तृतीया तदन्तमपि क्वचिन्न समस्यते। क्वचित्तु विभक्त्यन्तरमपि समस्यते।

"कृद्ग्रहणे गतिकारकपूर्वपदस्यापि ग्रहणम्" इति परिभाषायाः अस्मिन् सूत्रे उपयोगः अस्ति। "कृदन्तस्य ग्रहणे गतिपूर्वस्य कारकपूर्वस्यापि कृदन्तस्य ग्रहणं भवति" इति परिभाषार्थः। सूत्रे कृता इत्यनेन कृदन्तग्रहणादत्र प्रसङ्गतः गतिपूर्वस्यापि कृदन्तस्यापि ग्रहणं भवति।

उदाहरणम् - कर्तरि तृतीयान्तस्य कृदन्तेन समासस्योदाहरणं हरित्रातः। त्रातशब्दः कृदन्तः, हरिश्चात्र तृतीयान्तः कर्ता। हरिणा त्रातः इति लौकिकविग्रहे हरि टा त्रात सु इत्यलौकिकविग्रहे प्रकृतसूत्रेण कर्तरि विद्यमानं हरि टा इति सुबन्तं त्रात सु इति सुबन्तेन सह तत्पुरुषसंज्ञं भवति। ततः प्रक्रियाकार्ये निष्पन्नात् हरित्रातशब्दात् प्रथमैकवचने सौ हरित्रातः इति रूपम्। करणे समासस्योदाहरणं भवति नखैर्भिन्नः नखभिन्नः इति। भेदनक्रियायां नखाः करणानि, भिन्नशब्दश्च कृदन्तः।

बहुलग्रहणात् समासाभावस्योदाहरणं यथा दात्रेण लूनवान् इत्यादि। विभक्त्यन्तरमपि समस्यते इत्यस्योदाहरणं यथा पादहारकः इत्यादि। ह्रियते इति हारकः, बाहुलकात् कर्मणि ण्वुल्। पादाभ्यामिति अपादानपञ्चम्यन्तस्य समासः।

गतिपूर्वकस्य ग्रहणे नखनिर्भिन्नः इत्युदाहरणम्। अत्र निर्भिन्नः इत्यत्र निर् इति गतिसंज्ञकः। एवं निर्भिन्नः इति गतिपूर्वकेन कृदन्तेन सह नखैः इति करणे तृतीयान्तं वार्तिकसाहाय्येन प्रस्तुतसूत्रेण तत्पुरुषसमाससंज्ञं भवति। तेन नखनिर्भिन्नः इति रूपम्।

पाठगतप्रश्नाः-२

९. "तृतीया तत्कृतार्थेन गुणवचनेन" इति सूत्रस्यार्थः कः।

१०. तत्कृत इत्यस्यार्थः कः।

११. गुणवचनपदेन कस्य ग्रहणम्।

१२. "तृतीया तत्कृतार्थेन गुणवचनेन" इति सूत्रस्य सविग्रहम् एकमुदाहरणं देयम्।

१३. "कर्तृकरणे कृता बहुलम्" इति सूत्रस्यार्थः कः।

१४. बहुलग्रहणस्य किं फलम्।

१५. "कृद्ग्रहणे गतिकारकपूर्वपदस्यापि ग्रहणम्" इति परिभाषाया अर्थः कः।।

१६. "कर्तृकरणे कृता बहुलम्" इति सूत्रस्य सविग्रहम् एकमुदाहरणं देयम्।

[२.६] चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः॥ (२.१.३६)

सूत्रार्थः - चतुर्थ्यन्तार्थाय यत् तद्वाचिना अर्थबलिहितसुखरक्षितैः सह चतुर्थ्यन्तं सुबन्तं विकल्पेन तत्पुरुषसमाससंज्ञं भवति।

सूत्रव्याख्या - पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन सूत्रेण चतुर्थीतत्पुरुषसमासो भवति। सूत्रमिदं पदद्वयात्मकम्। तत्र चतुर्थी इति प्रथमैकवचनान्तं तथा तदर्थार्थबलिहितसुखरक्षितैः इति तृतीयाबहुवचनान्तं पदम्। समासः, सुप्, सह सुपा, विभाषा, तत्पुरुषश्चेत्येतानि पदानि पूर्वतोऽधिकृतानि। तदर्थञ्च अर्थश्च बलिश्च हितञ्च सुखञ्च रक्षितञ्च तदर्थार्थबलिहितसुखरक्षितानि तैः तदर्थार्थबलिहितसुखरक्षितैः इति इतरेतरद्वन्द्वः। "प्राक्कडारात्समासः", "तत्पुरुषः", "विभाषा" इति सूत्रत्रयमधिकृतम्। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सुप् इति पदमनुवर्तते। सुप् इत्यस्य तदन्तविधौ सुबन्तम् इति भवति। "प्रत्ययग्रहणे तदन्ता ग्राह्याः" इति परिभाषया चतुर्थीत्यत्र तदन्तविधौ चतुर्थ्यन्तं सुबन्तम् इति भवति।

सूत्रे तदंशेन चतुर्थ्यन्तं परामृश्यते। तेन तदर्थ इत्युक्ते चतुर्थ्यन्तार्थ इति गम्यते। किञ्च, चतुर्थ्यन्तस्य शब्दस्वरूपतया तेन कस्यचिद्वस्तुनः परामर्शाभावात् लक्षणया चतुर्थ्यन्तेन तद्वाच्यं तदेव गृह्यते। तस्मात् "चतुर्थ्यन्तवाच्यं यत् तद्वाचिना अर्थादिसुबन्तैश्च चतुर्थ्यन्तं सुबन्तं विकल्पेन तत्पुरुषसमाससंज्ञं भवति" इत्यर्थो लभ्यते।

अत्र चतुर्थ्यन्तं समर्थेन सुबन्तेन समस्यते। स च तत्पुरुषसमासः। अतः अयं समासः चतुर्थीतत्पुरुषः इत्यभिधीयते।

एतस्य सूत्रस्य व्याख्यानावसरे "अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम्" इति वार्त्तिकं प्रवर्तते। "अर्थशब्देन चतुर्थ्यन्तस्य नित्यसमासः समासे च विशेष्यलिङ्गता च भवति" इति वार्तिकस्यास्यार्थः। अनेन वार्तिकेन अर्थशब्देन चतुर्थ्यन्तस्य नित्यसमासो विधीयते, अन्यथा विभाषाधिकारात् अर्थेन समासे विकल्पापत्तिः स्यात्। तत्रेदमप्यवधेयं यदर्थेन समस्यमानस्य शब्दस्वरूपस्य विशेषणात्मकत्वात् प्रधानीभूतस्य विशेष्यस्य स्वलिङ्गतेष्टा। अन्यथा अर्थशब्दस्य नित्यपुंस्त्वात् "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इत्यनेन सर्वत्रैव पुंस्त्वमेव स्यात्।

उदाहरणम् - तदर्थस्योदाहरणं यथा यूपदारु इति। यूपाय दारु इति लौकिकविग्रहे यूप ङे दारु सु इत्यलौकिकविग्रहे प्रस्तुतसूत्रेण चतुर्थ्यन्तं यूप ङे इति सुबन्तं दारु सु इति तदर्थेन सुबन्तेन सह तत्पुरुषसमाससंज्ञं भवति। ततः समासविधायकसूत्रे चतुर्थी इत्यस्य प्रथमानिर्दिष्टत्वात् तद्बोध्यस्य यूप ङे इत्यस्योपसर्जनत्वात् पूर्वनिपाते यूप ङे दारु सु इति भवति। ततः समासस्य प्रातिपदिकत्वात् प्रातिपदिकावयवस्य सुपः ङेप्रत्ययस्य सोश्च लुकि यूपदारु इति शब्दो निष्पद्यते। तस्य प्रातिपदिकत्वात् प्रथमैकवचनविवक्षायां सौ यूपदारु इति रूपम्।

ननु रन्धनाय स्थाली इत्यत्रापि तदर्थसत्त्वात् तेन चतुर्थ्यन्तस्य सुबन्तस्य समासोऽस्तु इति शङ्का। अत्र समाधानमुच्यते यत् सूत्रे तदर्थशब्देन यत्र प्रकृतिविकृतिभावस्तत्रैव समासस्यास्य प्रसक्तिर्नान्यत्र।

अर्थशब्देन सह समासे तावद् द्विजायायं द्विजार्थः सूपः, द्विजार्था यवागूः, द्विजार्थं पयश्चेति तदुदाहरणानि। एवमेव भूतबलिः गोहितं गोसुखं गोरक्षितमित्यादीन्यपि सूत्रस्यास्योदाहरणानि भवन्ति।

[२.७] पञ्चमी भयेन॥ (२.१.३७)

सूत्रार्थः - पञ्चम्यन्तं सुबन्तं भयप्रकृतिकेन सुबन्तेन सह विकल्पेन तत्पुरुषसमास-संज्ञं भवति।

सूत्रव्याख्या - इदं सूत्रं विधायकम्। अनेन सूत्रेण पञ्चमीतत्पुरुषसमासो विधीयते।

सूत्रमिदं पदद्वयात्मकम्। तत्र पञ्चमी इति प्रथमैकवचनान्तं तथा भयेन इति तृतीयैकवचनान्तं पदम्। "प्राक्कडारात्समासः", "तत्पुरुषः", "विभाषा" इति सूत्रत्रयमधिकृतम्। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सुप् इति पदमनुवर्तते। सुप् इत्यस्य तदन्तविधौ सुबन्तम् इति भवति। "प्रत्ययग्रहणे तदन्ता ग्राह्याः" इति परिभाषया तदन्तविधौ पञ्चमी इत्यनेन पञ्चम्यन्तं सुबन्तं ग्राह्यम्। भयशब्दस्य सुबन्तत्वाभावाद् भयप्रकृतिके लक्षणा। एवं "पञ्चम्यन्तं सुबन्तं भयप्रकृतिकेन सुबन्तेन सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति" इति सूत्रार्थः।

अत्र पञ्चम्यन्तं समर्थेन सुबन्तेन समस्यते। स च तत्पुरुषसमासः। अतः अयं समासः पञ्चमीतत्पुरुषः इत्यभिधीयते।

उदाहरणम् - सूत्रस्यास्योदाहरणं यथा चोरभयम् इति। चोराद् भयम् इति लौकिकविग्रहे चोर ङसि भय सु इत्यलौकिकविग्रहे प्रकृतसूत्रेण भयप्रकृतिकेन सुबन्तेन भय सु इत्यनेन सह चोर ङसि इति पञ्चम्यन्तं सुबन्तं तत्पुरुषसमाससंज्ञं भवति। ततः पञ्चम्यन्तस्य पूर्वनिपाते चोर ङसि भय सु इति स्थिते, प्रातिपदिकत्वात् सुब्लुकि निष्पन्नात् चोरभयशब्दात् सौ प्रक्रियाकार्ये चोरभयम् इति रूपं निष्पन्नम्।

पाठगतप्रश्नाः-३

१७. "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः" इति सूत्रस्यार्थः कः।

१८. तदर्थशब्देन कस्य ग्रहणम्।

१९. "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः" इति सूत्रस्य सविग्रहम् एकमुदाहरणं देयम्।

२०. "अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम्" इति वार्तिकस्यार्थः कः।

२१. "पञ्चमी भयेन" इति सूत्रस्यार्थः कः।

२२. "पञ्चमी भयेन" इति सूत्रस्य सविग्रहम् एकमुदाहरणं देयम्।

[२.८] स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन॥ (२.१.३९)

सूत्रार्थः - स्तोकान्तिकदूरार्थवाचकानि कृच्छ्रशब्दप्रकृतिकं च पञ्चम्यन्तं सुबन्तं क्तान्तप्रकृतिकेन सुबन्तेन सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण पञ्चमीतत्पुरुषसमासो विधीयते। सूत्रमिदं पदद्वयात्मकम्। तत्र स्तोकान्तिकदूरार्थकृच्छ्राणि इति प्रथमाबहुवचनान्तं तथा क्तेन इति तृतीयैकवचनान्तं पदम्। "प्राक्कडारात्समासः", "तत्पुरुषः", "विभाषा" इति सूत्रत्रयमधिकृतम्। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सुप् इति पदमनुवर्तते। सुप् इत्यस्य तदन्तविधौ सुबन्तम् इति भवति। "पञ्चमी भयेन" इत्यस्मात् सूत्रादनुवृत्तस्य पञ्चमीत्यस्य “प्रत्ययग्रहणे तदन्ता ग्राह्याः" इति परिभाषया तदन्तविधौ पञ्चम्यन्तं सुबन्तम् इत्यर्थः भवति। स्तोकान्तिकदूराणि अर्था येषां ते स्तोकान्तिकदूरार्थाः इति बहुव्रीहिः। स्तोकान्तिकदूरार्थाः च कृच्छ्रञ्च स्तोकान्तिकदूरार्थकृच्छ्राणि इति इतरेतरयोगद्वन्द्वः। क्तेन इत्यस्य तदन्तविधौ तत्प्रकृतिके लक्षणया क्तान्तप्रकृतिकेन इत्यर्थः। एवं सूत्रार्थः समायाति "स्तोकान्तिकदूरार्थवाचकानि कृच्छ्रशब्दप्रकृतिकं च पञ्चम्यन्तं सुबन्तं क्तान्तप्रकृतिकेन सुबन्तेन सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति" इति।

उदाहरणम् - सूत्रस्यास्योदाहरणं यथा स्तोकान्मुक्तः इति। एवमेव अल्पान्मुक्तः अन्तिकादागतः दूरादागतः कृच्छ्रादागतः इत्यादीन्यस्य सूत्रस्योदाहरणानि। स्तोकान्मुक्तः इत्यत्र स्तोकान्मुक्तः इति लौकिकविग्रहे स्तोक ङसि मुक्त सु इत्यलौकिकविग्रहे स्तोक ङसि इति पञ्चम्यन्तं सुबन्तं मुक्त सु इति क्तान्तप्रकृतिकेन सुबन्तेन सह प्रकृतसूत्रेण तत्पुरुषसमाससंज्ञं भवति। ततः पञ्चम्यन्तस्य

प्रथमानिर्दिष्टत्वात् तद्बोध्यस्य स्तोक ङसि इत्यस्य "प्रथमानिर्दिष्टं समास उपसर्जनम्" इत्यनेन उपसर्जनत्वात् पूर्वनिपातो भवति। ततः स्तोक ङसि मुक्त सु इति समासस्य प्रातिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुपः ङसेः सोश्च लुकि प्राप्ते पञ्चम्याः अलुग्विधायकं सूत्रं प्रवृत्तम् -

[२.९] पञ्चम्याः स्तोकादिभ्यः॥ (६.३.२)

सूत्रार्थः - स्तोकान्तिकदूरार्थवाचकेभ्यः कृच्छ्रशब्दाच्च विहितायाः पञ्चम्याः उत्तरपदे परे लुक् न भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण अलुक् विधीयते। अलुक् नाम लुक् न भवति इति। सूत्रमिदं पदद्वयात्मकम्। तत्र पञ्चम्याः इति षष्ठ्येकवचनान्तं स्तोकादिभ्यः इति पञ्चमीबहुवचनान्तं पदम्। "अलुगुत्तरपदे" इत्यस्मात् सूत्राद् अलुग् उत्तरपदे इति पदद्वयमनुवर्तते। स्तोकादिशब्देन पूर्वसूत्रोक्तानां स्तोकान्तिकदूरार्थकृच्छ्राणां ग्रहणम्। एवं सूत्रार्थः समायाति "स्तोकान्तिकदूरार्थवाचकेभ्यः कृच्छ्रशब्दाच्च विहिता या पञ्चमी तस्याः उत्तरपदे परे लुक् न भवति" इति।

उदाहरणम् - स्तोकान्मुक्तः इत्यत्रोदाहरणम्। स्तोक ङसि मुक्त सु इति समासस्य प्रातिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुपः ङसेः सोश्च लुक् प्राप्नोति। तदा प्रस्तुतसूत्रेण पञ्चम्याः ङसेः अलुग् विधीयते। सोश्च "सुपो धातुप्रातिपदिकयोः" इत्यनेन लुकि सर्वसंयोगे स्तोकान्मुक्त इति शब्दो निष्पद्यते। ततः सौ प्रक्रियाकार्ये स्तोकान्मुक्तः इति रूपम्।

[२.१०] षष्ठी॥ (२.२.८)

सूत्रार्थः - षष्ठ्यन्तं सुबन्तं समर्थेन सुबन्तेन सह विकल्पेन समस्यते स च तत्पुरुषसमाससंज्ञः भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण षष्ठीतत्पुरुषसमासो विधीयते। सूत्रमिदम् एकपदात्मकम्। तत्र षष्ठी इति प्रथमैकवचनान्तं पदम्। "समर्थः पदविधिः", "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः", "विभाषा" इत्येतानि पूर्वतोऽधिकृतानि। "प्रत्ययग्रहणे तदन्ता ग्राह्याः" इति परिभाषया षष्ठी इत्यनेन षष्ठ्यन्तं सुबन्तमिति लभ्यते। एवं "षष्ठ्यन्तं सुबन्तं समर्थेन सुबन्तेन सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति" इति सूत्रार्थः समायाति।

अत्र षष्ठ्यन्तं समर्थेन सुबन्तेन समस्यते। स च तत्पुरुषसमासः। अतः अयं समासः षष्ठीतत्पुरुषः इत्यभिधीयते।

उदाहरणम् - सूत्रस्यास्योदाहरणं यथा राजपुरुषः इति। राज्ञः पुरुष इति लौकिकविग्रहे राजन् ङस् पुरुष सु इत्यलौकिकविग्रहे राजन् ङस् इति षष्ठ्यन्तं सुबन्तं पुरुष सु इति समर्थेन सुबन्तेन सह प्रकृतसूत्रेण तत्पुरुषसमाससंज्ञं भवति। ततः षष्ठ्यन्तस्य राजन् ङस् इत्यस्य उपसर्जनत्वात् पूर्वनिपाते राजन् ङस् पुरुष सु इति भवति। समुदायस्य प्रातिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुपः ङसः सोश्च लुकि राजन् पुरुष इति भवति। तदा "न लोपः प्रातिपदिकान्तस्य" इत्यनेन सूत्रेण

राजन्-शब्दस्य नकारस्य लोपे प्रक्रियाकार्ये निष्पन्नात् राजपुरुषशब्दात् सौ प्रक्रियाकार्ये राजपुरुषः इति रूपम्।

पाठगतप्रश्नाः-४

२३. "स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन" इति सूत्रस्यार्थः कः।
२४. "स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन" इति सूत्रस्य सविग्रहम् एकमुदाहरणं देयम्।
२५. स्तोकान्मुक्तः इत्यादौ पञ्चमीविभक्तेः अलुक् कथम्।
२६. "पञ्चम्याः स्तोकादिभ्यः" इति सूत्रस्यार्थः कः।
२७. "षष्ठी" इति सूत्रस्यार्थः कः।
२८. "षष्ठी" इति सूत्रस्य सविग्रहम् एकमुदाहरणं देयम्।

प्रसङ्गतः षष्ठीतत्पुरुषनिषेधकानि सूत्राणि वर्ण्यन्ते -

[२.११] न निर्धारणे॥ (२.२.१०)

सूत्रार्थः - निर्धारणे षष्ठ्यन्तं सुबन्तं न समस्यते।

सूत्रव्याख्या - पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन सूत्रेण षष्ठीतत्पुरुषसमासनिषेधो विधीयते। सूत्रमिदं पदद्वयात्मकम्। अस्मिन् सूत्रे निर्धारणे इति सप्तम्यन्तं पदं, नेति निषेधबोधकम् अव्ययपदम्। अत्र "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इत्येतानि अधिक्रियन्ते। "षष्ठी" इति सूत्रात् षष्ठी इति पदमनुवर्तते। निर्धारणे विधीयमाना या षष्ठी तादृशषष्ठ्यन्तस्य सुबन्तस्य सुबन्तेन सह "षष्ठी" इत्यनेन षष्ठीतत्पुरुषसमासः प्राप्नोति। स समासः अनेन निषिध्यते। अतः सूत्रस्यास्य अर्थो भवति - "निर्धारणे या षष्ठी तदन्तं सुबन्तं न समस्यते" इति।

निर्धारणं नाम जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणम् इति। यथा नृणां द्विजः श्रेष्ठः इत्यत्र "यतश्च निर्धारणम्" इत्यनेन नृणामित्यत्र निर्धारणे षष्ठी विहिता। अत्र नृसमुदायात् श्रेष्ठत्वधर्मेण द्विजस्य पृथक्करणं जातम्। यस्मात् पृथक्करणं तत्र षष्ठी।

उदाहरणम् - सूत्रस्यास्योदाहरणं यथा नृणां द्विजः श्रेष्ठः इति। "यतश्च निर्धारणम्" इत्यनेन नृणामित्यत्र निर्धारणे षष्ठी विहिता। ततः षष्ठी इत्यनेन सूत्रेण नृणामिति षष्ठ्यन्तस्य सुबन्तस्य द्विजः इति सुबन्तेन समासे प्राप्ते प्रकृतसूत्रेण निर्धारणषष्ठ्यन्तत्वात् नृणाम् इति पदस्य तेन सह समासनिषेधो भवति।

(२.११.१) प्रतिपदविधाना षष्ठी न समस्यते (वार्तिकम्)

वार्तिकार्थः - प्रतिपदविधाना या षष्ठी तदन्तं सुबन्तं न समस्यते।

वार्तिकव्याख्या - इदं वार्तिकं षष्ठीसमासनिषेधप्रसङ्गे विराजते। अनेन वार्तिकेन षष्ठीतत्पुरुषसमासनिषेधो विधीयते। वार्तिकमिदं पदचतुष्टयात्मकम्। अत्र प्रतिपदविधाना षष्ठी इति पदद्वयं प्रथमैकवचनान्तम्। नेति निषेधबोधकमव्ययम्। समस्यते इति क्रियापदम्। पदं पदं प्रति इति प्रतिपदम् इति वीप्सायामव्ययीभावः। "षष्ठी शेषे" इति शेषलक्षणां षष्ठीं वर्जयित्वा सर्वापि षष्ठी प्रतिपदविधाना इति महाभाष्याद्याकरग्रन्थाद् ज्ञायते। एवं प्रतिपदविधानषष्ठ्यन्तस्य षष्ठी इत्यनेन समासे प्राप्ते प्रोक्तवार्तिकेन तन्निषिध्यते।

उदाहरणम् - वार्तिकस्यास्योदाहरणं सर्पिषो ज्ञानम् इति। सर्पिषः इत्यत्र "ज्ञोऽविदर्थस्य करणे" इत्यनेन षष्ठी विहिता। सा च षष्ठी प्रतिपदविधाना षष्ठी भवति। अतः सर्पिषः इति षष्ठ्यन्तस्य सुबन्तस्य ज्ञानम् इत्यनेन सुबन्तेन सह "षष्ठी" इत्यनेन सूत्रेण समासे प्राप्ते सर्पिषः इत्यस्य प्रतिपदविधानषष्ठ्यन्तत्वात् प्रोक्तवार्तिकेन समासनिषेधो भवति।

पाठगतप्रश्नाः-५

२९. "न निर्धारणे" इति सूत्रस्यार्थः कः।

३०. नृणां द्विजः श्रेष्ठः इत्यत्र कथं न षष्ठीसमासः।

३१. निर्धारणं नाम किम्।

३२. "प्रतिपदविधाना षष्ठी न समस्यते" इति वार्तिकस्यार्थः कः।

३३. प्रतिपदविधाना षष्ठी का।

३४. सर्पिषो ज्ञानम् इत्यत्र कथं न समासः।

[२.१२] पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन॥ (२.२.११)

सूत्रार्थः - पूरणाद्यर्थैः सदादिभिश्च षष्ठ्यन्तं सुबन्तं समाससंज्ञं न भवति। (समासो न भवति।)

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन सूत्रेण षष्ठीतत्पुरुष-समासनिषेधो विधीयते। सूत्रमिदं एकपदात्मकम्। अत्र पूरणगुणसुहितार्थसदव्ययतव्य-समानाधिकरणेन इति तृतीयैकवचनान्तं पदम्। पूरणश्च, गुणश्च, सुहितं च पूरणगुणसुहितानि इति इतरेतरयोगद्वन्द्वसमासः। तानि अर्था येषां ते पूरणगुणसुहितार्थाः इति बहुव्रीहिसमासः। पूरणगुणसुहितार्थाश्च सच्च अव्ययं च तव्यश्च समानाधिकरणञ्च इति पूरणगुणसुहितार्थसदव्ययसमानाधिकरणम्, पूरणगुणसुहितार्थसदव्ययसमानाधिकरणेन इति समाहारद्वन्द्वः।

पूरणार्थशब्देन पुरणार्थकप्रत्ययान्तानां शब्दानां ग्रहणम्। गुणार्थशब्देन प्रधानत्वेन उपसर्जनत्वेन च गुणवाची यः शब्दः तस्य ग्रहणम्। सुहितार्थो नाम तृप्त्यर्थकः। सत् इति पदेन तौ सत् इति सूत्रेण सत्संज्ञकौ यौ शतृशानच्प्रत्ययौ तदन्तानां बोधः। अव्ययपदेनात्र सत्तव्येति पूर्वोत्तरयोः साहचर्यात् कृदन्तानां क्त्वातोसुन्कसुन्नन्तानां ग्रहणम्, तेषां क्त्वातोसुन्कसुनः इत्यनेनाव्ययसंज्ञाविधानात्। तेन तस्य उपरि तदुपरि इत्यादौ समासः दुर्वारः। तव्यस्य प्रत्ययत्वात् तदन्तानां बोधो भवति। अत्र "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इत्येतानि अधिक्रियन्ते। "षष्ठी" इत्यस्मात् षष्ठी इति पदं "न निर्धारणे" इत्यस्मात् नेति पदमनुवर्तते। सूत्रस्यास्यार्थो भवति - "षष्ठ्यन्तं सुबन्तं पूरणाद्यर्थैः सदादिभिश्च न समस्यते" इति। अर्थात् "पूरणाद्यर्थैः सदादिभिश्च षष्ठ्यन्तस्य सुबन्तस्य समासो न भवति" इति।

उदाहरणम् - सूत्रस्यास्योदाहरणानि क्रमशः प्रस्तूयन्ते।

पूरणार्थेन निषेधे सतां षष्ठः इत्याद्युदाहरणम्। षण्णां पूरणः इत्यर्थे "तस्य पूरणे डट्" इत्यनेन डटि "षट्कतिकतिपयचतुरां थुक्" इत्यनेन थुकि च षष्ठः इति रूपम्। अत्र सताम् इति षष्ठ्यन्तस्य पूरणार्थकषष्ठशब्देन "षष्ठी" इत्यनेन षष्ठीसमासे प्राप्ते तन्निषेधः प्रकृतसूत्रेण विधीयते।

गुणेन निषेधे काकस्य कार्ष्ण्यम् इत्याद्युदाहरणम्। कृष्णशब्दात् भावे ष्यञि कार्ष्ण्यशब्दो निष्पन्नः। अतः कार्ष्ण्यम् इत्यस्य गुणवाचकत्वात् तेन सह काकस्य इति षष्ठ्यन्तस्य "षष्ठी" इत्यनेन षष्ठीसमासे प्रकृतसूत्रेण स निषिध्यते। गुणेन यो निषेधो विहितः सोऽनित्यः "तदशिष्यं संज्ञाप्रमाणत्वात्" इति सूत्रे संज्ञायाः गुणभूतप्रमाणत्वशब्देन सह समासदर्शनात्। निषेधस्य अनित्यत्वात् अर्थस्य गौरवम् अर्थगौरवम्, बुद्धेः मान्द्यं बुद्धिमान्द्यम् इत्यादिषु नायं निषेधः।

सुहितार्थेन निषेधे फलानां सुहितः इत्यादिकमुदाहरणम्। अत्र षष्ठ्यन्तस्य फलशब्दस्य सुहितशब्देन सह प्राप्तस्य षष्ठीसमासस्य प्रकृतसूत्रेण निषेधो विधीयते।

सदन्तेन निषेधे द्विजस्य कुर्वन् कुर्वाणो वा इत्याद्युदाहरणम्। कृधातोः शतरि शानचि च यथाक्रमं कुर्वन् कुर्वाणः चेति रूपद्वयम्। अत्र षष्ठ्यन्तस्य द्विजशब्दस्य कुर्वन् इत्यनेन कुर्वाणः इत्यनेन वा योगे प्राप्तः षष्ठीसमासः अनेन निषिध्यते।

अव्ययेन निषेधे ब्राह्मणस्य कृत्वा इत्यादिकमत्रोदाहरणम् । कृत्वा इत्यस्य अव्ययसंज्ञकत्वात् ब्राह्मणस्येति षष्ठ्यन्तेन प्राप्तः षष्ठीसमासः अनेन निषिध्यते।

तव्यप्रत्ययान्तेन निषेधे ब्राह्मणस्य कर्तव्यम् इत्याद्यत्रोदाहरणम्। कृधातोः तव्यत्तव्यानीयरः इत्यनेन तव्यप्रत्यये कर्तव्यम् इति रूपम्। षष्ठ्यन्तस्य ब्राह्मणस्येति सुबन्तस्य तव्यप्रत्ययान्तेन कर्तव्यम् इत्यनेन प्राप्तः षष्ठीसमासः अनेन निषिध्यते। तव्यत्प्रत्ययान्तेन योगे तु समासो भवत्येव। स्वस्य कर्तव्यम् इति विग्रहे स्वकर्तव्यम् इति षष्ठीसमासः। तव्यति कृते कृदुत्तरपदप्रकृतिस्वरेण प्रकृतिस्वरः, तव्ये तु नेति फलभेदः।

समानाधिकरणेन निषेधे तक्षकस्य सर्पस्य इत्याद्युदाहरणम्। अत्र तक्षकस्येति षष्ठ्यन्तस्य सुबन्तस्य षष्ठ्यन्तेन सर्पस्येति सुबन्तेन प्राप्तः षष्ठीसमासः समानाधिकरणत्वात् प्रकृतसूत्रेण निषिध्यते। अत्र "विशेषणं विशेष्येण बहुलम्" इत्यनेन प्राप्तः कर्मधारयसमासः बहुलग्रहणसामर्थ्यात् न भवति।

पाठगतप्रश्नाः-६

३५. "पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन" इति सूत्रस्यार्थः कः।

३६. गुणशब्देन षष्ठीसमासनिषेधः अनित्यः कथम्।

३७. पूरणार्थेन षष्ठीसमासनिषेधे किमुदाहरणम्।

३८. सदन्तेन षष्ठीसमासनिषेधे किमुदाहरणम्।

३९. अव्ययेन षष्ठीसमासनिषेधे किमुदाहरणम्।

४०. स्वकर्तव्यम् इत्यत्र कथं समासः।

[२.१३] क्तेन च पूजायाम्॥ (२.२.१२)

सूत्रार्थः - "मतिबुद्धिपूजार्थेभ्यश्च" इत्यनेन विहितः यः क्तप्रत्ययः, तदन्तेन षष्ठ्यन्तस्य सुबन्तस्य समासो न भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण षष्ठीतत्पुरुषसमासनिषेधो विधीयते। सूत्रमिदं पदत्रयात्मकम्। अस्मिन् सूत्रे क्तेन इति तृतीयैकवचनान्तं पदम्। चेत्यव्ययपदम्। पूजायामिति सप्तम्येकवचनान्तं पदम्। अत्र "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इत्येतानि अधिक्रियन्ते। "षष्ठी" इत्यस्मात् षष्ठी इति पदं "न निर्धारणे" इत्यस्मात् नेति पदमनुवर्तते। अत्र पूजायां क्तेन न षष्ठीसमासः इत्यन्वयः। पूजाग्रहणं मतिबुद्धिपूजार्थेभ्यश्च इति सूत्रोपलक्षणम्। एवं सूत्रार्थो भवति - "मतिबुद्धिपूजार्थेभ्यश्च इत्यनेन विहितः यः क्तप्रत्ययः, तदन्तेन षष्ठ्यन्तस्य सुबन्तस्य समासो न भवति" इति।

उदाहरणम् - सूत्रस्यास्योदाहरणं यथा राज्ञां मतः इति। मतः इत्यत्र "मतिबुद्धिपूजार्थेभ्यश्च" इत्यनेन वर्तमाने क्तः विहितः। अतः वर्तमानार्थकस्य क्तस्य योगे "क्तस्य च वर्तमाने" इत्यनेन राजन्शब्दात् षष्ठीविभक्तौ राज्ञाम् इति रूपम्। अत्र षष्ठ्यन्तस्य राज्ञाम् इत्यस्य सुबन्तस्य मतः इति सुबन्तेन सह प्राप्तः षष्ठीसमासः प्रकृतसूत्रेण निषिध्यते। राज्ञाम् इष्यमाणः इत्यर्थः। एवमेव राज्ञां बुद्धः राज्ञां पूजितः इत्यादौ न समासः।

ननु राजमतः, राजबुद्धः, राजपूजितः इत्यादिषु कथं समासः इति चेदुच्यते अत्र राजभिः पूजितः इति विग्रहे भूते क्तान्तेन सह तृतीयान्तस्य समासः। तृतीयासमासत्वात् नेदं सूत्रं समासं बाधते।

[२.१४] अधिकरणवाचिना च॥ (२.२.१३)

सूत्रार्थः - अधिरकरणवाची यः क्तप्रत्ययः, तदन्तेन षष्ठ्यन्तस्य सुबन्तस्य समासो न भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण षष्ठीतत्पुरुषसमासनिषेधो विधीयते। सूत्रमिदं पदद्वयात्मकम्। अत्र अधिकरणवाचिना इति तृतीयैकवचनान्तं पदम्। चेति अव्ययपदम्। अत्र "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इत्येतानि अधिक्रियन्ते। "षष्ठी" इत्यस्मात् षष्ठी इति पदं "न निर्धारणे" इत्यस्मात् नेति "क्तेन च पूजायाम्" इत्यस्माच्च क्तेन इति पदं चानुवर्तते। एवं सूत्रार्थो भवति - "अधिकरणवाची यः क्तप्रत्ययः, तदन्तेन षष्ठ्यन्तस्य सुबन्तस्य समासो न भवति" इति।

उदाहरणम् - सूत्रस्यास्योदाहरणं तावत् इदमेषामासितम् इत्यादिकम्। आसितम् इत्यत्र "क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः" इति अधिकरणे क्तः। अत्र "अधिकरणवाचिनश्च" इत्यनेन अधिकरणवाचिक्तान्तेन योगे एषाम् इत्यत्र षष्ठीविभक्तिः। अत्र एषाम् इत्यस्य षष्ठ्यन्तस्य आसितम् इति क्तप्रत्ययान्तेन योगे प्राप्तः षष्ठीसमासः प्रस्तुतसूत्रेण निषिध्यते।

[२.१५] कर्मणि च॥ (२.२.१४)

सूत्रार्थः - "उभयप्राप्तौ कर्मणि" इत्यनेन विहिता या षष्ठी तदन्तस्य सुबन्तस्य सुबन्तेन समासो न भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण षष्ठीतत्पुरुषसमासनिषेधो विधीयते। सूत्रमिदं पदद्वयात्मकम्। अत्र कर्मणि इति सप्तम्येकवचनान्तं पदम्। चेति अव्ययपदम्। अत्र "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इत्येतानि अधिक्रियन्ते। "षष्ठी" इत्यस्मात् षष्ठी इति पदं "न निर्धारणे" इत्यस्माच्च नेति पदमनुवर्तते। चेति इतिपर्यायः। अतः कर्मणि इति सप्तम्येकवचनमुच्चार्य या षष्ठी तदन्तस्य सुबन्तेन सह समासो न इति सूत्रार्थः प्रतीयते। एवं सूत्रार्थो भवति - "उभयप्राप्तौ कर्मणि" इत्यनेन विहिता या षष्ठी तदन्तस्य सुबन्तस्य सुबन्तेन समासो न भवति" इति।

उदाहरणम् - सूत्रस्यास्योदाहरणं तावत् आश्चर्यो गवां दोहोऽगोपेन इत्यादिकम्। गवाम् इत्यत्र कर्तरि कर्मणि च षष्ठ्यां प्राप्तायाम् "उभयप्राप्तौ कर्मणि" इत्यनेन कर्मणि एव षष्ठी। अतः गवाम् इति षष्ठ्यन्तस्य दोहः इति सुबन्तेन सह प्राप्तः षष्ठीसमासः प्रस्तूतसूत्रेण निषिध्यते।

पाठगतप्रश्नाः-७

४१. "क्तेन च पूजायाम्" इति सूत्रस्यार्थः कः।

४२. सूत्रे पूजाग्रहणं किमर्थम्।

४३. क्तेन च पूजायाम्" इति सूत्रस्य उदाहरणम् एकं देयम्।

४४. "अधिकरणवाचिना च" इति सूत्रस्यार्थः कः।

४५. "अधिकरणवाचिना च" इति सूत्रस्य उदाहरणम् एकं देयम्।

४६. "कर्मणि च" इति सूत्रस्यार्थः कः।

४७. "कर्मणि च" इति सूत्रस्य उदाहरणम् एकं देयम्।

[२.१६] तृजकाभ्यां कर्तरि॥ (२.२.१५)

सूत्रार्थः - कर्त्रर्थकौ यौ तृजकौ प्रत्ययौ तदन्तेन सुबन्तेन सह षष्ठ्यन्तस्य सुबन्तस्य समासो न भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण षष्ठीतत्पुरुषसमासनिषेधो विधीयते। सूत्रमिदं पदद्वयात्मकम्। अत्र तृजकाभ्यामिति तृतीयाद्विवचनान्तं कर्तरि इति सप्तम्येकवचनान्तं पदम्। अत्र कर्तरि इति तृजकयोरेव विशेषणं, न तु अनुवृत्तषष्ठ्याः। तृच्प्रत्ययान्ताः ण्वुल्प्रत्ययान्ताश्च तृजकेत्यंशेन स्वीक्रियन्ते। अत्र "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इत्येतानि अधिक्रियन्ते। "षष्ठी" इत्यस्मात् षष्ठी इति पदं "न निर्धारणे" इत्यस्माच्च नेति पदमनुवर्तते। एवं सूत्रार्थो भवति - "कर्त्रर्थकौ यौ तृजकौ प्रत्ययौ तदन्तेन सुबन्तेन सह षष्ठ्यन्तस्य सुबन्तस्य समासो न भवति" इति।

उदाहरणम् - सूत्रस्यास्य तृजन्तेन निषेधे तावत् अपां स्रष्टा इत्यादिकम् उदाहरणम्। सृज्धातोः "ण्वुल्तृचौ" इत्यनेन तृचि स्रष्टा इति रूपम्। स्रष्टा इत्यनेन योगे षष्ठ्यन्तस्य अपाम् इत्यस्य प्राप्तः षष्ठीसमासः प्रस्तुतसूत्रेण निषिध्यते।

एवं ण्वुल्प्रत्ययान्तस्य निषेधे ओदनस्य पाचकः इत्यादिकमुदाहरणम्। अत्र पच्धातोः "ण्वुल्तृचौ" इत्यनेन कर्तरि ण्वुलि अकादेशे पाचकः इति रूपम्। पाचकः इत्यनेन योगे ओदनस्य इति षष्ठ्यन्तस्य प्राप्तः षष्ठीसमासः प्रस्तुतसूत्रेण निषिध्यते।

[२.१७] कर्तरि च॥ (२.२.१६)

सूत्रार्थः - कर्तरि या षष्ठी तदन्तस्य ण्वुल्प्रत्ययान्तेन सह समासो न भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण षष्ठीतत्पुरुषसमासनिषेधो विधीयते।सूत्रमिदं पदद्वयात्मकम्। अत्र कर्तरि इति सप्तम्येकवचनान्तं पदम्। चेति अव्ययपदम्। अत्र "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इत्येतानि अधिक्रियन्ते। "षष्ठी" इत्यस्मात् षष्ठी इति पदं "न निर्धारणे" इत्यस्माच्च नेति पदमनुवर्तते। "तृजकाभ्यां कर्तरि" इत्यतः अकेनेत्यंशः अनुवर्तते। तस्य ण्वुलप्रत्ययान्तेन इत्यर्थः। अत्र कर्तरि इति पदं षष्ठी इति अनुवृत्तपदेन सह अन्वेति। एवं सूत्रार्थो भवति - "कर्तरि या षष्ठी तदन्तस्य सुबन्तस्य ण्वुल्प्रत्ययान्तेन सह समासो न भवति" इति।

उदाहरणम् - भवतः शायिका इत्यादिकम् अस्य सूत्रस्योदाहरणम्। शीधातोः ण्वुल्, अकादेशे टापि प्रक्रियाकार्ये शायिका इति रूपम्। तेन योगे "कर्तृकर्मणोः कृति" इति सूत्रेण भवतः इत्यत्र कर्तरि षष्ठी। अत्र अकस्य कर्त्रर्थकत्वाभावात् "तृजकाभ्यां कर्तरि" इति सूत्रं न प्रवर्तते। ततः भवतः इत्यनेन

षष्ठ्यन्तेन शायिका इत्यस्य ण्वुल्प्रत्ययान्तस्य षष्ठीतत्पुरुषसमासे प्राप्ते प्रस्तुतसूत्रेण भवतः इत्यत्र षष्ठ्याः कर्तरि विधानात् षष्ठीसमासनिषेधो भवति।

[२.१८] पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे॥ (२.२.१)

सूत्रार्थः - यदा अवयवी एकत्वविशिष्टः तदा अवयविना सह पूर्वादीनां सुबन्तानां विकल्पेन तत्पुरुषसमासो भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण तत्पुरुषसमासो विधीयते। "षष्ठी" इत्यनेन प्राप्तस्य समासस्यापवादभूतम् इदं सूत्रम्। सूत्रमिदं पदत्रयात्मकम्। अत्र पूर्वापराधरोत्तरम् इति प्रथमैकवचनान्तम्, एकदेशिना इति तृतीयैकवचनान्तम् एकाधिकरणे इति च सप्तम्येकवचनान्तं पदम्। अत्र "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः", "विभाषा" इत्येतानि अधिक्रियन्ते। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सूत्रात् सुप् इत्यनुवर्तते। पूर्वापराधरोत्तरमित्यस्य विशेषणत्वात् सुप् इत्यस्य तदन्तविधौ पूर्वापराधरोत्तरं सुबन्तम् इति भवति। पूर्वञ्च परञ्च अधरञ्च उत्तरञ्च इति विग्रहे समाहारद्वन्द्वे पुर्वापराधरोत्तरम् इति। एकदेशः अवयवः यस्यास्ति सः एकदेशी इति एकदेशशब्दाद् इनिप्रत्ययः। एकदेशी नाम अवयवी। एकदेशिना नाम अवयविना इति। एकं च तदधिकरणं च एकाधिकरणम्, तस्मिन् एकाधिकरणे इति कर्मधारयसमासः। एकं नाम एकत्वसंख्याविशिष्टम् इति। अधिकरणशब्दश्चात्र द्रव्यपरकः। एकाधिकरणे इत्यस्य सम्बन्धः एकदेशिना इति पदेन सह वर्तते। एवं च सूत्रार्थः - "यदा अवयवी एकत्वविशिष्टः तदा अवयविना सह पूर्वादीनां सुबन्तानां विकल्पेन तत्पुरुषसमासो भवति" इति।

उदाहरणम् - सूत्रस्यास्योदाहरणं यथा पूर्वकायः इति। पूर्वं कायस्येति लौकिकविग्रहे पूर्व सु काय ङस् इत्यलौकिकविग्रहे "षष्ठी" इत्यनेन षष्ठीतत्पुरुषसमासे प्राप्ते तं प्रबाध्य प्रकृतसूत्रेण काय ङस् इति एकत्वसंख्याविशिष्टेन अवयविवाचकेन सुबन्तेन पूर्व सु इति सुबन्तं प्रोक्तसूत्रेण तत्पुरुषसमाससंज्ञं भवति। ततः सूत्रे प्रथमानिर्दिष्टत्वात् पूर्व सु इति सुबन्तस्य उपसर्जनसंज्ञायां पूर्वनिपाते पूर्व सु काय ङस् इति भवति। ततः सुब्लुकि निष्पन्नात् पूर्वकायशब्दात् सौ प्रक्रियाकार्ये पूर्वकायः इति रूपम्। अपरकायः अधरकायः इत्यादीन्येतस्य सूत्रस्योदाहरणानि।

पाठगतप्रश्नाः-८

४८. "तृजकाभ्यां कर्तरि" इति सूत्रस्यार्थः कः।

४९. "तृजकाभ्यां कर्तरि" इति सूत्रस्य तृचा निषेधे किम् उदाहरणम्।

५०. "तृजकाभ्यां कर्तरि" इति सूत्रस्य अका निषेधे किम् उदाहरणम्।

५१. "कर्तरि च" इति सूत्रस्यार्थः कः।

५२. "कर्तरि च" इति सूत्रस्य उदाहरणम् एकं देयम्।

५३. "पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे" इति सूत्रस्यार्थः कः।

५४. "पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे" इति सूत्रस्य उदाहरणम् एकं देयम्।

[२.१९] अर्धं नपुंसकम्॥ (२.२.२)

सूत्रार्थः - समांशवाची नित्यं नपुंसकलिङ्गे विद्यमानः अर्धशब्दः अवयविना सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति, एकत्वसंख्याविशिष्टः चेद् अवयवी।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण तत्पुरुषसमासो विधीयते। "षष्ठी" इत्यनेन प्राप्तस्य समासस्यापवादभूतम् इदं सूत्रम्। सूत्रमिदं पदद्वयात्मकम्। अत्र अर्धम् नपुंसकम् इति पदद्वयं प्रथमैकवचनान्तम्। अत्र "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः", "विभाषा" इत्येतानि अधिक्रियन्ते। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सूत्रात् सुप् इति "पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे" इत्यस्माच्च एकदेशिना एकाधिकरणे इति पदद्वयमनुवर्तते। समांशवाचिनः नित्यनपुंसकलिङ्गे विद्यमानस्यैव अर्धशब्दस्यात्र ग्रहणम्। एवं च सूत्रार्थः भवति - "समांशवाची नित्यं नपुंसकलिङ्गे विद्यमानः अर्धशब्दः एकत्वसंख्या-विशिष्टेन द्रव्यवाचकेन अवयविना सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति" इति।

उदाहरणम् - सूत्रस्यास्योदाहरणं यथा अर्धपिप्पली इति। अर्धं पिप्पल्याः इति लौकिकविग्रहे अर्ध सु पिप्पली ङस् इत्यलौकिकविग्रहे "षष्ठी" इत्यनेन षष्ठीतत्पुरुषसमासे प्राप्ते तं प्रबाध्य प्रकृतसूत्रेण पिप्पली ङस् इति एकत्वसंख्याविशिष्टेन अवयविवाचकेन सुबन्तेन सह अर्ध सु इति समांशवाची नित्यं नपुंसकलिङ्गे विद्यमानः तत्पुरुषसमाससंज्ञो भवति। ततः अर्ध सु इत्यस्य प्रथमानिर्दिष्टत्वाद् उपसर्जनसंज्ञायां पूर्वनिपाते सुब्लुकि निष्पन्नात् अर्धपिप्पली इत्यस्मात् सौ प्रक्रियाकार्ये अर्धपिप्पली इति रूपम्।

[२.२०] सप्तमी शौण्डैः॥ (२.१.४०)

सूत्रार्थः - सप्तम्यन्तं सुबन्तं शौण्डादिप्रकृतिकैः सुबन्तैः सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन सूत्रेण सप्तमी-तत्पुरुषसमासो विधीयते। सूत्रमिदं पदद्वयात्मकम्। अत्र सप्तमी इति प्रथमैकवचनान्तं शौण्डैः इति च तृतीयाबहुवचनान्तं पदम्। अत्र "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः", "विभाषा" इत्येतानि अधिक्रियन्ते। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सूत्रात् सुप् इत्यनुवर्तते। "प्रत्ययग्रहणे तदन्ता ग्राह्याः" इति परिभाषया सप्तमीत्यत्र तदन्तविधौ सप्तम्यन्तं सुबन्तम् इति लभ्यते। शौण्डशब्दे बहुवचननिर्देशाद् गणपाठाच्च शौण्डशब्दः शौण्डादिगणे विद्यमानानां शौण्डादीनां बोधकः। शौण्डादीनां तत्प्रकृतिके लक्षणा। एवं च सूत्रार्थः- "सप्तम्यन्तं सुबन्तं शौण्डादिप्रकृतिकैः सुबन्तैः सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति" इति।

अत्र सप्तम्यन्तं समर्थेन सुबन्तेन समस्यते। स च तत्पुरुषसमासः। अतः अयं समासः सप्तमीतत्पुरुषः इत्यभिधीयते।

उदाहरणम् - सूत्रस्यास्योदाहरणं यथा अक्षशौण्डः इति। अक्षेषु शौण्डः इति लौकिकविग्रहे अक्ष सुप् शौण्ड सु इत्यलौकिकविग्रहे अक्ष सुप् इति सप्तम्यन्तं सुबन्तं शौण्ड सु इत्यनेन शौण्डप्रकृतिकेन सुबन्तेन सह प्रकृतसूत्रेण तत्पुरुषसमाससंज्ञं भवति। ततः समासविधायकशास्त्रे सप्तमी इत्यस्य प्रथमानिर्दिष्टत्वात् तद्बोध्यस्य अक्ष सुप् इत्यस्य उपसर्जनसंज्ञायां पूर्वनिपाते अक्ष सुप् शौण्ड सु इति भवति। ततः समासस्य प्रातिपदिकसंज्ञायां सुपः सोश्च लुकि सर्वसंयोगे अक्षशौण्ड इति निष्पद्यते। तस्मात्प्रथमैकवचने सौ प्रक्रियाकार्ये अक्षशौण्डः इति रूपम्।

पाठगतप्रश्नाः-९

५५. "अर्धं नपुंसकम्" इति सूत्रस्यार्थः कः।

५६. "अर्धं नपुंसकम्" इति सूत्रस्य उदाहरणम् एकं देयम्।

५७. "सप्तमी शौण्डैः" इति सूत्रस्यार्थः कः।

५८. "सप्तमी शौण्डैः" इति सूत्रस्य उदाहरणम् एकं देयम्।

पाठसारः

समासभेदेषु तृतीयः तत्पुरुषसमासः अस्मिन् पाठे प्रतिपादितः। "तत्पुरुषः" इत्यधिकृत्य अयं समासः प्रवर्तते। प्रायेण उत्तरपदार्थप्रधानः अयं समासः। अयं च तत्पुरुषसमासः समानाधिकरणः व्यधिकरणः चेति द्विधा विभक्त इति वक्तुं शक्यते। तत्र व्यधिकरणतत्पुरुषविधायकानां सूत्राणाम् अस्मिन् पाठे सन्निवेशः। व्यधिकरणे पदे इत्यस्य अर्थो हि असमानविभक्तिके पदे इति। व्यधिकरणे अस्य स्तः इति व्यधिकरणः इति अर्शआदित्वादच्प्रत्ययः। एवं यस्मिन् तत्पुरुषे समस्यमानानि पदानि समानविभक्तिकानि न सन्ति स व्यधिकरणः तत्पुरुषः। विशेषप्रयोजनसाधनाय द्विगुसमासस्य "द्विगुश्च" इत्यनेनन तत्पुरुषसंज्ञा अत्र वर्णिता। व्यधिकरणतत्पुरुषः पुनः द्वितीयातत्पुरुषः, तृतीयातत्पुरुषः, चतुर्थीतत्पुरुषः, पञ्चमीतत्पुरुषः षष्ठीतत्पुरुषः सप्तमीतत्पुरुषश्चेति षड्विधः। "द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" इति द्वितीयातत्पुरुषस्य, "तृतीया तत्कृतार्थेन गुणवचनेन" इति "कर्तृकरणे कृता बहुलम्" इति च तृतीयातत्पुरुषस्य, "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः" इति चतुर्थीतत्पुरुषस्य, "पञ्चमी भयेन" इति "स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन" इति च पञ्चमीतत्पुरुषस्य, "षष्ठी" इति षष्ठीतत्पुरुषस्य "सप्तमी शौण्डैः" इति सप्तमीतत्पुरुषस्य च विधायकानि सूत्राणि व्याख्यातानि। पञ्चमीसमासावसरे "पञ्चम्याः स्तोकादिभ्यः" इति पञ्चम्या अलुग्विधायकं सूत्रं व्याख्यातम्।

"पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे", "अर्धं नपुंसकम्" इति षष्ठीसमासापवादभूतं समासविधायकं सूत्रद्वयं व्याख्यातम्। तत्र च "अर्धेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम्" इति वार्त्तिकं व्याख्यातम्। षष्ठीसमासनिषेधकानि "न निर्धारणे", "पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन", "क्तेन च पूजायाम्", "अधिकरणवाचिना च", "कर्मणि च", "तृजकाभ्यां कर्तरि", "कर्तरि च" इत्येतानि सप्त सूत्राणि "प्रतिपदविधाना षष्ठी न समस्यते" इति वार्तिकं च व्याख्यातम्। एवं व्यधिकरणतत्पुरुषसमासः अस्मिन् पाठे प्रतिपादितः।

पाठान्तप्रश्नाः

१. "द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" इति सूत्रं व्याख्यात।
२. "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः" इति सूत्रं व्याख्यात।
३. "पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन" इति सूत्रं व्याख्यात।
४. "पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे" इति सूत्रं व्याख्यात।
५. "सप्तमी शौण्डैः" इति सूत्रं व्याख्यात।
६. कृष्णश्रितः इति रूपं साधयत।
७. यूपदारु इति रूपं साधयत।
८. अर्धपिप्पली इति रूपं साधयत।
९. अक्षशौण्डः इति रूपं साधयत।
१०. षष्ठीसमासनिषेधकानि सूत्राणि कानि, अर्थोदाहरणैः सह तानि व्याख्यात।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि-१

१. "शेषो बहुव्रीहिः" (२.२.२३) इत्यस्मात् सूत्रात्प्राक्पर्यन्तम्।
२. द्विगुरपि तत्पुरुषसंज्ञकः भवति।
३. समासान्तप्रत्ययविधानम्।
४. द्वितीयातत्पुरुषसमासः।
५. द्वितीयान्तं सुबन्तं श्रितादिप्रकृतिकैः सुबन्तैः सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति।
६. इतरेतरयोगद्वन्द्वसमासः। श्रितश्च अतीतश्च पतितश्च गतश्च अत्यस्तश्च प्राप्तश्च आपन्नश्च श्रितातीतपतितगतात्यस्तप्राप्तापन्नाः, तैः श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः इति विग्रहः।
७. श्रितादीनां शब्दानां तत्प्रकृतिके लक्षणा।

८. कृष्णं श्रितः इति विग्रहे कृष्णश्रितः इति उदाहरणम्।

उत्तराणि-२

९. तृतीयान्तं सुबन्तं तृतीयान्तार्थकृतगुणवचनेन अर्थशब्देन च सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति।

१०. तृतीयान्तार्थाकृत इत्यर्थः।

११. ये शब्दाः पूर्वं गुणवाचकाः आसन् इदानीं द्रव्यवाचकास्ते एव गुणवचनशब्देन गृह्यन्ते।

१२. शङ्कुलया खण्डः इति विग्रहे शङ्कुलाखण्डः।

१३. कर्तरि करणे च विद्यमानं तृतीयान्तं सुबन्तं कृदन्तेन सह बहुलं तत्पुरुषसमाससंज्ञं भवति।

१४. दात्रेण लूनवान् इत्यादौ समासः न।

१५. कृदन्तस्य ग्रहणे गतिपूर्वस्य कारकपूर्वस्यापि कृदन्तस्य ग्रहणं भवति इति परिभाषार्थः।

१६. हरिणा त्रातः हरित्रातः इति।

उत्तराणि-३

१७. चतुर्थ्यन्तार्थाय यत् तद्वाचिना अर्थबलिहितसुखरक्षितैः सह चतुर्थ्यन्तं सुबन्तं विकल्पेन तत्पुरुषसमाससंज्ञं भवति।

१८. प्रकृतिविकृतिभावस्य ग्रहणम्।

१९. यूपाय दारु इति विग्रहे यूपदारु इति उदाहरणम्।

२०. अर्थशब्देन चतुर्थ्यन्तस्य नित्यसमासः समासे च विशेष्यलिङ्गता भवति" इति वार्तिकस्यास्यार्थः।

२१. पञ्चम्यन्तं सुबन्तं भयप्रकृतिकेन सुबन्तेन सह विकल्पेन तत्पुरुषसमास-संज्ञं भवति इति सूत्रार्थः।

उत्तराणि-४

२२. चोराद् भयम् इति विग्रहे चोरभयम् इति एकम् उदाहरणम्।

२३. स्तोकान्तिकदूरार्थवाचकानि कृच्छ्रशब्दप्रकृतिकं च पञ्चम्यन्तं सुबन्तं क्तान्तप्रकृतिकेन सुबन्तेन सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति।

२४. स्तोकात् मुक्तः इति विग्रहे समासे स्तोकान्मुक्तः इति एकम् उदाहरणम्।

२५. पञ्चम्याः स्तोकादिभ्यः इति सूत्रेण।

२६. स्तोकान्तिकदूरार्थवाचकेभ्यः कृच्छ्रशब्दाच्च विहितायाः पञ्चम्याः उत्तरपदे परे लुक् न भवति इति सूत्रार्थः।

२७. षष्ठ्यन्तं सुबन्तं समर्थेन सुबन्तेन सह विकल्पेन समस्यते स च तत्पुरुषससंज्ञः भवति।

२८. राज्ञः पुरुषः इति विग्रहे राजपुरुषः।

उत्तराणि-५

२९. निर्धारणे षष्ठ्यन्तं सुबन्तं न समस्यते।

३०. न निर्धारणे इति सूत्रेण निषेधात् नात्र षष्ठीसमासः।

३१. जातिगुणक्रियासंज्ञाभिः समुदायाद् एकदेशस्य पृथक्करणं निर्धारणम्।

३२. प्रतिपदविधाना या षष्ठी तदन्तं सुबन्तं न समस्यते।

३३. "षष्ठी शेषे" इति शेषलक्षणां षष्ठीं वर्जयित्वा सर्वापि षष्ठी प्रतिपदविधाना इति महाभाष्याद्याकरग्रन्थाद् ज्ञायते।

३४. प्रतिपदविधाना षष्ठी न समस्यते इति षष्ठीसमासनिषेधात् नात्र षष्ठीसमासः।

उत्तराणि-६

३५. पूरणाद्यर्थैः सदादिभिश्च षष्ठ्यन्तं सुबन्तं समाससंज्ञं न भवति। (समासो न भवति।)

३६. "तदशिष्यं संज्ञाप्रमाणत्वात्" इति सूत्रे संज्ञायाः गुणभूतप्रमाणत्वशब्देन सह समासदर्शनात्।

३७. षण्णां पूरणः इति।

३८. द्विजस्य कुर्वन् कुर्वाणो वा।

३९. ब्राह्मणस्य कृत्वा।

४०. तव्यत्-प्रत्ययेन योगात् समासः।

उत्तराणि-७

४१. "मतिबुद्धिपूजार्थेभ्यश्च" इत्यनेन विहितः यः क्तप्रत्ययः, तदन्तेन षष्ठ्यन्तस्य सुबन्तस्य समासो न भवति।

४२. पूजाग्रहणं मतिबुद्धिपूजार्थेभ्यश्च इति सूत्रोपलक्षणम्।

४३. राज्ञां मतः इति।

४४. अधिरकरणवाची यः क्तप्रत्ययः, तदन्तेन षष्ठ्यन्तस्य सुबन्तस्य समासो न भवति

४५. इदमेषाम् आसीतम् इति।

४६. "उभयप्राप्तौ कर्मणि" इत्यनेन विहिता या षष्ठी तदन्तस्य सुबन्तस्य सुबन्तेन समासो न भवति।

४७. आश्चर्यो गवां दोहो अगोपेन इति।

उत्तराणि-८

४८. कर्त्रर्थकौ यौ तृजकौ प्रत्ययौ तदन्तेन सुबन्तेन सह षष्ठ्यन्तस्य सुबन्तस्य समासो न भवति।

४९. अपां स्रष्टा इति।

५०. ओदनस्य पाचकः इति।

५१. कर्तरि या षष्ठी तदन्तस्य ण्वुल्प्रत्ययान्तेन सह समासो न भवति।

५२. भवतः शायिका इति।

५३. यदा अवयवी एकत्वविशिष्टः तदा अवयविना सह पूर्वादीनां सुबन्तानां विकल्पेन तत्पुरुषसमासो भवति।

५४. पूर्वकायः।

उत्तराणि-९

५५. समांशवाची नित्यं नपुंसकलिङ्गे विद्यमानः अर्धशब्दः अवयविना सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति, एकत्वसंख्याविशिष्टः चेद् अवयवी।

५६. अर्धपिप्पली इति।

५७. सप्तम्यन्तं सुबन्तं शौण्डादिप्रकृतिकैः सुबन्तैः सह विकल्पेन तत्पुरषसमाससंज्ञं भवति इति सूत्रार्थः।

५८. अक्षशौण्डः।

॥इति द्वितीयः पाठः॥